শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ চতুশ্চৎৱারিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুশ্চৎৱারিংশঃ সর্গঃ ॥

## ভগীরথং প্রশস্য ব্রহ্মণা তস্মৈ গঙ্গাজলেন পিতৃতর্পণং কর্তুমনুজ্ঞাদানং তৎসর্ৱং কৃৎৱা ভগীরথস্য স্বপুরে গমনং গঙ্গাৱতরণোপাখ্যানস্য মহিমা চ

স গৎৱা সাগরং রাজা গঙ্গযানুগতস্তদা।
প্রৱিৱেশ তলং ভূমের্যত্র তে ভস্মসাৎকৃতাঃ॥ **1.44.1**॥

ভস্মন্যথাপ্লতে রাম গঙ্গাযাঃ সলিলেন ৱৈ।
সর্ৱলোকপ্রভুর্ব্রহ্মা রাজানমিদমব্রৱীৎ॥ **1.44.2**॥

তারিতা নরশার্দূল দিৱং যাতাশ্চ দেৱৱৎ।
ষষ্টিঃ পুত্রসহস্রাণি সগরস্য মহাত্মনঃ॥ **1.44.3**॥

সাগরস্য জলং লোকে যাৱৎস্থাস্যতি পার্থিৱ।
সগরস্যাত্মজাঃ সর্ৱে দিৱি স্থাস্যন্তি দেৱৱৎ॥ **1.44.4**॥

ইযং চ দুহিতা জ্যেষ্ঠা তৱ গঙ্গা ভৱিষ্যতি।
ৎৱৎকৃতেন চ নাম্নাথ লোকে স্থাস্যতি ৱিশ্রুতা॥ **1.44.5**॥

গঙ্গা ত্রিপথগা নাম দিৱ্যা ভাগীরথীতি চ।
ত্রীন্ পথো ভাৱযন্তীতি তস্মাৎ ত্রিপথগা স্মৃতা॥ **1.44.6**॥

পিতামহানাং সর্ৱেষাং ৎৱমত্র মনুজাধিপ।
কুরুষ্ৱ সলিলং রাজন্ প্রতিজ্ঞামপৱর্জয॥ **1.44.7**॥

পূর্ৱকেণ হি তে রাজংস্তেনাতিযশসা তদা।
ধর্মিণাং প্রৱরেণাথ নৈষ প্রাপ্তো মনোরথঃ॥ **1.44.8**॥

তথৈৱাংশুমতা ৱৎস লোকেঽপ্রতিমতেজসা।
গঙ্গাং প্রার্থযতা নেতুং প্রতিজ্ঞা নাপৱর্জিতা॥ **1.44.9**॥

রাজর্ষিণা গুণৱতা মহর্ষিসমতেজসা।
মত্তুল্যতপসা চৈৱ ক্ষত্রধর্মস্থিতেন চ॥ **1.44.10**॥

দিলীপেন মহাভাগ তৱ পিত্রাতিতেজসা।
পুনর্ন শকিতা নেতুং গঙ্গাং প্রার্থযতানঘ॥ **1.44.11**॥

সা ৎৱযা সমতিক্রান্তা প্রতিজ্ঞা পুরুষর্ষভ।
প্রাপ্তোঽসি পরমং লোকে যশঃ পরমসম্মতম্॥ **1.44.12**॥

তচ্চ গঙ্গাৱতরণং ৎৱযা কৃতমরিন্দম।
অনেন চ ভৱান্ প্রাপ্তো ধর্মস্যাযতনং মহৎ॥ **1.44.13**॥

প্লাৱযস্ৱ ৎৱমাত্মানং নরোত্তম সদোচিতে।
সলিলে পুরুষশ্রেষ্ঠ শুচিঃ পুণ্যফলো ভৱ॥ **1.44.14**॥

পিতামহানাং সর্ৱেষাং কুরুষ্ৱ সলিলক্রিযাম্।
স্ৱস্তি তেঽস্তু গমিষ্যামি স্ৱং লোকং গম্যতাং নৃপ॥ **1.44.15**॥

ইত্যেৱমুক্ত্ৱা দেৱেশঃ সর্ৱলোকপিতামহঃ।
যথাগতং তথাগচ্ছদ্ দেৱলোকং মহাযশাঃ॥ **1.44.16**॥

ভগীরথস্তু রাজর্ষিঃ কৃৎৱা সলিলমুত্তমম্।
যথাক্রমং যথান্যাযং সাগরাণাং মহাযশাঃ॥ **1.44.17**॥

কৃতোদকঃ শুচী রাজা স্ৱপুরং প্রৱিৱেশ হ।
সমৃদ্ধার্থো নরশ্রেষ্ঠ স্ৱরাজ্যং প্রশশাস হ॥ **1.44.18**॥

প্রমুমোদ চ লোকস্তং নৃপমাসাদ্য রাঘৱ।
নষ্টশোকঃ সমৃদ্ধার্থো বভূৱ ৱিগতজ্ৱরঃ॥ **1.44.19**॥

এষ তে রাম গঙ্গাযা ৱিস্তরোঽভিহিতো মযা।
স্ৱস্তি প্রাপ্নুহি ভদ্রং তে সন্ধ্যাকালোঽতিৱর্ততে॥ **1.44.20**॥

ধন্যং যশস্যমাযুষ্যং পুত্র্যং স্ৱর্গ্যমথাপি চ।
যঃ শ্রাৱযতি ৱিপ্রেষু ক্ষত্রিযেষ্ৱিতরেষু চ॥ **1.44.21**॥

প্রীযন্তে পিতরস্তস্য প্রীযন্তে দৈৱতানি চ।
ইদমাখ্যানমাযুষ্যং গঙ্গাৱতরণং শুভম্॥ **1.44.22**॥

যঃ শৃণোতি চ কাকুৎস্থ সর্ৱান্ কামানৱাপ্নুযাৎ।
সর্ৱে পাপাঃ প্রণশ্যন্তি আযুঃ কীর্তিশ্চ ৱর্ধতে॥ **1.44.23**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে চতুশ্চৎৱারিংশঃ সর্গঃ॥